# Shankukarnakritam Shiva Stotram

# શઙ્કુકર્ણકૃતં શિવસ્તોત્રમ્

## Document Information

Text title : Shankukarnakritam Shiva Stotram

File name : shankukarNakRRitaMshivastotram.itx

Category : shiva, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : from Kurmapurana, kUrmapurANe pUrvabhAge 33/36-45

Latest update : August 13, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 13, 2022

*sanskritdocuments.org*

# શઙ્કુકર્ણકૃતં શિવસ્તોત્રમ્

શઙ્કુકર્ણ ઉવાચ ।
કપર્દિનં ત્વાં પરતઃ પરસ્તાદ્ગોપ્તારમેકં પુરુષં પુરાણમ્ ।
વ્રજામિ યોગેશ્વરમીશિતારમાદિત્યમગ્નિં કપિલાધિરૂઢમ્ ॥ ૧॥

ત્વાં બ્રહ્મપારં હૃદિ સન્નિવિષ્ટં હિરણ્મયં યોગિનમાદિમન્તમ્ ।
વ્રજામિ રુદ્રં શરણં દિવિસ્થં મહામુનિં બ્રહ્મમયં પવિત્રમ્ ॥ ૨॥

સહસ્રપાદાક્ષિશિરોઽભિયુક્તં સહસ્રબાહું તમસઃ પરસ્તાત્ ।
ત્વાં બ્રહ્મપારં પ્રણમામિ શમ્ભું હિરણ્યગર્ભાધિપતિં ત્રિનેત્રમ્ ॥ ૩॥

યતઃ પ્રસૂતિર્જગતો વિનાશો યેનાવૃતં સર્વમિદં શિવેન ।
તં બ્રહ્મપારં ભગવન્તમીશં પ્રણમ્ય નિત્યં શરણં પ્રપદ્યે ॥ ૪॥

અલિઙ્ગમાલોકવિહીનરૂપં સ્વયમ્પ્રભું ચિત્પતિમેકરુદ્રમ્ ।
તં બ્રહ્મપારં પરમેશ્વરં ત્વાં નમસ્કરિષ્યે ન યતોઽન્યદસ્તિ ॥ ૫॥

યં યોગિનસ્ત્યક્તસબીજયોગા લબ્ધ્વા સમાધિં પરમાત્મભૂતાઃ ।
પશ્યન્તિ દેવં પ્રણતોઽસ્મિ નિત્યં તં બ્રહ્મપારં ભવતઃ સ્વરૂપમ્ ॥ ૬॥

ન યત્ર નામાનિ વિશેષતૃપ્તિર્ન સન્દૃશે તિષ્ઠતિ યત્સ્વરૂપમ્ ।
તં બ્રહ્મપારં પ્રણતોઽસ્મિ નિત્યં સ્વયમ્ભુવં ત્વાં શરણં પ્રપદ્યે ॥ ૭॥

યદ્વેદવેદાભિરતા વિદેહં સબ્રહ્મવિજ્ઞાનમભેદમેકમ્ ।
પશ્યન્ત્યનેકં ભવતઃ સ્વરૂપં તદ્બ્રહ્મપારં પ્રણતોઽસ્મિ નિત્યમ્ ॥ ૮॥

યતઃ પ્રધાનં પુરુષઃ પુરાણો વિવર્ત્તતે યં પ્રણમન્તિ દેવાઃ ।
નમામિ તં જ્યોતિષિ સન્નિવિષ્ટં કાલં બૃહન્તં ભવતઃ સ્વરૂપમ્ ॥ ૯॥

વ્રજામિ નિત્યં શરણં ગુહેશં સ્થાણું પ્રપદ્યે ગિરિશં પુરાણમ્ ।
શિવં પ્રપદ્યે હરમિન્દુમૌલિં પિનાકિનં ત્વાં શરણં વ્રજામિ ॥ ૧૦॥

ઇતિ કૂર્મપુરાણે ત્રયસ્ત્રિંશાધ્યાયાન્તર્ગતં

શઙ્કુકર્ણકૃતં શિવસ્તોત્રં સમાપ્તમ્ ।
કૂર્મપુરાણે પૂર્વભાગે ૩૩/૩૬-૪૫

Proofread by PSA Easwaran

---

*Shankukarnakritam Shiva Stotram*

pdf was typeset on August 13, 2022

Please send corrections to *sanskrit@cheerful.com*